॥ वाल्मीकि रामायण॥

२ अयोध्याकाण्ड

अध्याय ९

एवमुक्ता तु कैकेयी क्रोधेन ज्वलिताननना ।
दीर्घमुष्णं विनिःश्वस्य मन्थरामिदमब्रवीत् ॥१॥

अद्य राममितः क्षिप्रं वनं प्रस्थापयाम्यहम् ।
यौवराज्येन भरतं क्षिप्रमेवाभिषेचये ॥२॥

इदं त्विदानीं सम्पश्य केनोपायेन मन्थरे ।
भरतः प्राप्नुयाद्राज्यं न तु रामः कथं चन ॥३॥

एवमुक्ता तया देव्या मन्थरा पापदर्शिनी ।
रामार्थमुपहिंसन्ती कैकेयीमिदमब्रवीत् ॥४॥

हन्तेदानीं प्रवक्ष्यामि कैकेयि श्रूयतां च मे ।
यथा ते भरतो राज्यं पुत्रः प्राप्स्यति केवलम् ॥५॥

श्रुत्वैवं वचनं तस्या मन्थरायास्तु कैकयी ।
किं चिदुत्थाय शयनात्स्वास्तीर्णादिदमब्रवीत् ॥६॥

कथय त्वं ममोपायं केनोपायेन मन्थरे ।
भरतः प्राप्नुयाद्राज्यं न तु रामः कथं चन ॥७॥

एवमुक्ता तया देव्या मन्थरा पापदर्शिनी ।
रामार्थमुपहिंसन्ती कुब्जा वचनमब्रवीत् ॥८॥

तव देवासुरे युद्धे सह राजर्षिभिः पतिः ।
अगच्छत्त्वामुपादाय देवराजस्य साह्यकृत् ॥९॥

दिशमास्थाय कैकेयि दक्षिणां दण्डकान्प्रति ।
वैजयन्तमिति ख्यातं पुरं यत्र तिमिध्वजः ॥१०॥

स शम्बर इति ख्यातः शतमायो महासुरः ।
ददौ शक्रस्य सङ्ग्रामं देवसङ्घैरनिर्जितः ॥११॥

तस्मिन्महति सङ्ग्रामे राजा दशरथस्तदा ।
अपवाह्य त्वया देवि सङ्ग्रामान्नष्टचेतनः ॥१२॥

तत्रापि विक्षतः शस्त्रैः पतिस्ते रक्षितस्त्वया ।
तुष्टेन तेन दत्तौ ते द्वौ वरौ शुभदर्शने ॥१३॥

स त्वयोक्तः पतिर्देवि यदेच्छेयं तदा वरौ ।
गृह्णीयामिति तत्तेन तथेत्युक्तं महात्मना ।
अनभिज्ञा ह्यहं देवि त्वयैव कथितं पुरा ॥१४॥

तौ वरौ याच भर्तारं भरतस्याभिषेचनम् ।
प्रव्राजनं च रामस्य त्वं वर्षाणि चतुर्दश ॥१५॥

क्रोधागारं प्रविश्याद्य क्रुद्धेवाश्वपतेः सुते ।
शेष्वानन्तर्हितायां त्वं भूमौ मलिनवासिनी ।
मा स्मैनं प्रत्युदीक्षेथा मा चैनमभिभाषथाः ॥१६॥

दयिता त्वं सदा भर्तुरत्र मे नास्ति संशयः ।
त्वत्कृते च महाराजो विशेदपि हुताशनम् ॥१७॥

न त्वां क्रोधयितुं शक्तो न क्रुद्धां प्रत्युदीक्षितुम् ।
तव प्रियार्थं राजा हि प्राणानपि परित्यजेत् ॥१८॥

न ह्यतिक्रमितुं शक्तस्तव वाक्यं महीपतिः ।
मन्दस्वभावे बुध्यस्व सौभाग्यबलमात्मनः ॥१९॥

मणिमुक्तासुवर्णानि रत्नानि विविधानि च ।
ददाद्दशरथो राजा मा स्म तेषु मनः कृथाः ॥२०॥

यौ तौ देवासुरे युद्धे वरौ दशरथोऽददात् ।
तौ स्मारय महाभागे सोऽर्थो मा त्वाम् अतिक्रमेत् ॥२१॥

यदा तु ते वरं दद्यात्स्वयमुत्थाप्य राघवः ।
व्यवस्थाप्य महाराजं त्वमिमं वृणुया वरम् ॥२२॥

रामं प्रव्राजयारण्ये नव वर्षाणि पञ्च च ।
भरतः क्रियतां राजा पृथिव्यां पार्थिवर्षभः ॥२३॥

एवं प्रव्राजितश्चैव रामोऽरामो भविष्यति ।
भरतश्च हतामित्रस्तव राजा भविष्यति ॥२४॥

येन कालेन रामश्च वनात्प्रत्यागमिष्यति ।
तेन कालेन पुत्रस्ते कृतमूलो भविष्यति ।

सङ्गृहीतमनुष्यश्च सुहृद्भिः सार्धमात्मवान् ॥ २५ ॥

प्राप्तकालं तु ते मन्ये राजानं वीतसाध्वसा ।
रामाभिषेकसङ्कल्पान्निगृह्य विनिवर्तय ॥ २६ ॥

अनर्थमर्थरूपेण ग्राहिता सा ततस्तया ।
हृष्टा प्रतीता कैकेयी मन्थरामिदमब्रवीत् ॥ २७ ॥

कुब्जे त्वां नाभिजानामि श्रेष्ठां श्रेष्ठाभिधायिनीम् ।
पृथिव्यामसि कुब्जानामुत्तमा बुद्धिनिश्चये ॥ २८ ॥

त्वमेव तु ममार्थेषु नित्ययुक्ता हितैषिणी ।
नाहं समवबुध्येयं कुब्जे राज्ञश्चिकीर्षितम् ॥ २९ ॥

सन्ति दुःसंस्थिताः कुब्जा वक्राः परमपापिकाः ।
त्वं पद्ममिव वातेन संनता प्रियदर्शना ॥ ३० ॥

उरस्तेऽभिनिविष्टं वै यावत्स्कन्धात्समुन्नतम् ।
अधस्ताच्चोदरं शान्तं सुनाभमिव लज्जितम् ॥ ३१ ॥

जघनं तव निर्घुष्टं रशनादामशोभितम् ।
जङ्घे भृशमुपन्यस्ते पादौ चाप्यायतावुभौ ॥ ३२ ॥

त्वमायताभ्यां सक्थिभ्यां मन्थरे क्षौमवासिनि ।
अग्रतो मम गच्छन्ती राजहंसीव राजसे ॥ ३३ ॥

तवेदं स्थगु यद्दीर्घं रथघोणमिवायतम् ।
मतयः क्षत्रविद्याश्च मायाश्चात्र वसन्ति ते ॥ ३४ ॥

अत्र ते प्रतिमोक्ष्यामि मालां कुब्जे हिरण्मयीम् ।
अभिषिक्ते च भरते राघवे च वनं गते ॥ ३५ ॥

जात्येन च सुवर्णेन सुनिष्टप्तेन सुन्दरि ।
लब्धार्था च प्रतीता च लेपयिष्यामि ते स्थगु ॥ ३६ ॥

मुखे च तिलकं चित्रं जातरूपमयं शुभम् ।
कारयिष्यामि ते कुब्जे शुभान्याभरणानि च ॥ ३७ ॥

परिधाय शुभे वस्त्रे देवदेव चरिष्यसि ।
चन्द्रमाह्वयमानेन मुखेनाप्रतिमानना ।
गमिष्यसि गतिं मुख्यां गर्वयन्ती द्विषज्जनम् ॥ ३८ ॥

तवापि कुब्जाः कुब्जायाः सर्वाभरणभूषिताः ।
पादौ परिचरिष्यन्ति यथैव त्वं सदा मम ॥ ३९ ॥

इति प्रशस्यमाना सा कैकेयीमिदमब्रवीत् ।
शयानां शयने शुभ्रे वेद्यामग्निशिखाम् इव ॥ ४० ॥

गतोदके सेतुबन्धो न कल्याणि विधीयते ।
उत्तिष्ठ कुरु कल्याणं राजानमनुदर्शय ॥ ४१ ॥

तथा प्रोत्साहिता देवी गत्वा मन्थरया सह ।
क्रोधागारं विशालाक्षी सौभाग्यमदगर्विता ॥ ४२ ॥

अनेकशतसाहस्रं मुक्ताहारं वराङ्गना ।
अवमुच्य वरार्हाणि शुभान्याभरणानि च ॥ ४३ ॥

ततो हेमोपमा तत्र कुब्जा वाक्यं वशं गता ।
संविश्य भूमौ कैकेयी मन्थरामिदमब्रवीत् ॥ ४४ ॥

इह वा मां मृतां कुब्जे नृपायावेदयिष्यसि ।
वनं तु राघवे प्राप्ते भरतः प्राप्स्यति क्षितिम् ॥ ४५ ॥

अथैतदुक्त्वा वचनं सुदारुणं
निधाय सर्वाभरणानि भामिनी ।
असंवृतामास्तरणेन मेदिनीं
तदाधिशिश्ये पतितेव किन्नरी ॥ ४६ ॥

उदीर्णसंरम्भतमोवृताननना
तथावमुक्तोत्तममाल्यभूषणा ।
नरेन्द्रपत्नी विमना बभूव सा
तमोवृता द्यौरिव मग्नतारका ॥ ४७ ॥

The files in this directory are revised versions of the digital files produced by Professor Muneo Tokunaga, Kyoto University, and copyrighted by him. I am grateful to Professor Tokunaga for his agreement to this use of his original files and for permitting the revised versions to be made publicly available.
Dr J. D. Smith ; email: jds10@cam.ac.uk ; http://bombay.oriental.cam.ac.uk/index.html

ITRANS conversion questions to: Avinash Chopde ¡avinash@acm.org¿

Last updated on March 25, 1998; Send corrections to sanskrit@cheerful.com